## खण्ड – II

## भाषा – I

## संस्कृत

अत्र **त्रिंशत्** प्रश्नाः सन्ति ।

**सर्वे** प्रश्नाः समाधेयाः ।

अधोलिखितं गद्यांशमाधारीकृत्य निम्नलिखिताः **( 31 - 36 )** प्रश्नाः समाधेयाः –

मानवजीवने अनुशासनस्य खलु महती आवश्यकतास्ति । यदि मानवाः अनुशासनशीलाः न भवेयुः तदा तु विचित्रा जगतः गतिः स्यात् । यदि सर्वे जनाः स्वेच्छया कार्यं कुर्वन्ति तदा सर्वत्रैव कार्यहानिः भवेत् । अनुशासनेन एव अस्माकं सर्वाणि कार्याणि भवन्ति । यस्मिन् देशे अनुशासनव्यवस्था उत्तमा वर्तते, तस्मिन् देशे एव सुख-प्राप्तिः भवति । अनुशासनेन एव सर्वेषां कल्याणं भवति ।

31. 'जगतः' इत्यत्र का विभक्तिः ?

(A) सप्तमी
(B) चतुर्थी
(C) षष्ठी
(D) तृतीया

32. तदा तु विचित्रा जगतः गतिः स्यात् । अस्मिन् वाक्ये विशेषणपदमस्ति –

(A) विचित्रा
(B) जगतः
(C) गतिः
(D) तदा

33. 'कार्यहानिः' इत्यत्र कः समासः ?

(A) अव्ययीभावः
(B) कर्मधारयः
(C) बहुव्रीहिः
(D) तत्पुरुषः

34. 'प्राप्तिः' इत्यत्र कः उपसर्गः ?

(A) आङ्
(B) प्र
(C) आप्
(D) प्रा

35. 'गतिः' इत्यत्र कः प्रत्ययः ?

(A) क्तिन्
(B) क्त
(C) ति
(D) णिनि

36. तस्मिन् देशे एव सुख-प्राप्तिः भवति ।
अस्मिन् वाक्ये अव्ययपदमस्ति –

(A) तस्मिन्
(B) सुखप्राप्तिः
(C) एव
(D) भवति

www.MDSmartClasses.com



Scanned with CamScanner

अधोलिखितं गद्यांशं पठित्वा निम्नलिखिताः **( 37 - 42 )** प्रश्नाः समाधेयाः –

विश्वप्रसिद्धां पशुमेलां द्रष्टुं ग्रामीणजनाः विदेशिपर्यटकाः च आगच्छन्ति । अस्य मासस्य कार्तिकपूर्णिमायां जनाः पुष्करस्य सरोवरे आत्मनः पवित्रार्थं स्नानं कुर्वन्ति । मेलायाम् अश्वानां नृत्यम्, उष्ट्राणां धावनं सौन्दर्यप्रतियोगिताश्च विदेशिपर्यटकाणां सांस्कृतिकी-प्रतिस्पर्द्धाः भवन्ति । श्रेष्ठजातीयाणां पशूनां कृते पुरस्काराणि मेलासमितिपक्षतः प्रदीयन्ते । प्रायः मेलायां सर्वत्र उष्ट्राणां सम्मेलनं दृश्यते । राजस्थानस्य क्रमेलकः (उष्ट्रः) राज्यपशुः घोषितः वर्तते ।

37. ग्रामीणजनाः विदेशिपर्यटकाः च आगच्छन्ति । रेखाङ्कितं क्रियापदं लङ्लकारे परिवर्तयतु –

(A) आगच्छन् (B) आगमिष्यन्ति
(C) आगच्छन्तु (D) आगच्छेयुः

38. 'मेलायाम् अश्वानां नृत्यम् .................. प्रतिस्पर्द्धाः भवन्ति । अस्मिन् वाक्ये प्रश्ननिर्माणाय निम्नाङ्कितं पदमुपयुक्तम् –

(A) किम् (B) कस्य
(C) कदा (D) केषां

39. मेलासमितिपक्षतः - इत्यत्र प्रत्ययः विद्यते –

(A) क्त (B) तरप्
(C) तसिल् (D) तमप्

40. आत्मनः पवित्रार्थं स्नानं कुर्वन्ति । रेखांङ्कितपदे विभक्तिरस्ति –

(A) षष्ठी (B) प्रथमा
(C) चतुर्थी (D) पञ्चमी

41. 'देशी' पदस्य विलोमपदं वर्तते –

(A) विदेही (B) विदेशी
(C) विदिशा (D) राज्य

42. 'प्रदीयन्ते' अस्मिन् पदे लकारः वर्तते –

(A) लोट् लकार (B) लङ् लकार
(C) लृट् लकार (D) लट् लकार



www.MDSmartClasses.com
Scanned with CamScanner

43. 'मैं कलम से पत्र लिखूँगा' अस्य वाक्यस्य अनुवादः अस्ति –

(A) अहं कलमेन पत्रं लिखिष्यामि
(B) अहं कलमेन पत्रं लेखिष्यामि
(C) अहं कलमेन पत्रं लिखामि
(D) अहं कलमेन पत्रः लिखानि

44. "नृपः दरिद्राय दानं ददाति" अस्य वाक्यस्य कर्मवाच्ये रूपं भविष्यति –

(A) नृपेण दरिद्राय दानं दीयते ।
(B) नृपेण दरिद्रं दानं दियेत ।
(C) नृपेण दरिद्राय दानं ददाति ।
(D) नृपाय दरिद्राय दानं दीयते ।

45. वाक्यमिदं संशोधयत - कविभिः कालिदासः श्रेष्ठः ।

(A) कविनां कालिदासः श्रेष्ठः ।
(B) कवीन् कालिदासः श्रेष्ठः ।
(C) कविषु कालिदासः श्रेष्ठः ।
(D) कवयः कालिदासाः श्रेष्ठः ।

46. रिक्तस्थानं पूरयित्वा सूक्ति संयोजयत –

.............. प्रतिकूलानि परेषां न समाचरेत –

(A) आत्मनः
(B) आत्मना
(C) आत्मनि
(D) आत्मानम्

47. प्राचीनतम-पाठशालाविधौ कोऽयं विधिः सन्निहितः नास्ति ?

(A) पारायण विधिः
(B) प्रश्नोत्तर विधिः
(C) सूत्र विधिः
(D) प्रत्यक्ष विधिः

48. प्रारम्भिकस्तरे कस्य कार्यस्य प्रधानता भवेत् ?

(A) पठन कार्यस्य
(B) अभ्यास कार्यस्य
(C) मौखिक कार्यस्य
(D) लेखन कार्यस्य

49. 'भण्डारकरविधेः' अपरं नाम किम् ?

(A) व्याकरण विधिः
(B) व्याकरणानुवाद विधिः
(C) व्याख्या विधिः
(D) पाठ्यपुस्तक विधिः

50. शिक्षकः कया परीक्षया उच्चारणस्य, शब्दभण्डारस्य अभिव्यक्तेः सामर्थ्यस्य च परीक्षां करोति ?

(A) मौखिक परीक्षया
(B) लिखित परीक्षया
(C) प्रायोगिक परीक्षया
(D) सामयिक परीक्षया

51. भाषाधिगमस्य प्रक्रिया कथं प्रारम्भा भवति ?

(A) नेत्राभ्यां हस्ताभ्यां च
(B) पादाभ्यां कर्णाभ्यां च
(C) नासिकया मुखेन च
(D) कर्णाभ्यां जिह्वया च

www.MDSmartClasses.com



Scanned with CamScanner

52. शिक्षणस्य केन्द्रबिन्दुरस्ति

(A) भवनम्
(B) पाठ्यपुस्तकम्
(C) श्यामपट्टम्
(D) भ्रमणम्

53. भाषायाः विचाराभिव्यक्तिः भवति –

(A) दर्शनेन वाचनेन च
(B) भाषणेन दर्शनेन च
(C) भाषणेन लेखनेन च
(D) श्रवणेन मननेन च

54. गद्यखण्डानां पद्यानां च शुद्धोच्चारणे वाचनस्य कार्यं कस्मिन् सिद्धान्ते भवति ?

(A) अभ्यास सिद्धान्ते
(B) सक्रियता सिद्धान्ते
(C) रुचि सिद्धान्ते
(D) मौखिक कार्य सिद्धान्ते

55. व्याकरणशिक्षणस्य कृते सर्वाधिकम् उपयुक्तमस्ति –

(A) सरलात् कठिनं प्रति
(B) ज्ञातादज्ञातं प्रति
(C) आगमनात् निगमनं प्रति
(D) अनिश्चितात् निश्चितं प्रति

56. संस्कृतव्याकरणशिक्षणस्य, दर्शनशिक्षणस्य च प्राचीनतमो विधिर्विद्यते –

(A) कक्षानायक विधिः
(B) भाषण विधिः
(C) प्रश्नोत्तर विधिः
(D) सूत्र विधिः

57. श्रीसीतारामभट्टपर्वणीकरमहोदयस्य महाकाव्यं वर्तते –

(A) हरनामामृतम्
(B) कच्छवंशः
(C) मोहभङ्गम्
(D) ईश्वरविलासः

58. "चन्द्रमहीपतिः" उपन्यासः लिखितोऽस्ति –

(A) श्रीनिवासाचार्येण
(B) डॉ० प्रभाकरशास्त्रिणा
(C) भट्टमथुरानाथशास्त्रिणा
(D) श्रीनारायणशास्त्रिणा

59. कच्छवंशं महाकाव्यं केन विरचितम् ?

(A) पं० सूर्यनारायणशास्त्रि महोदयेन
(B) श्रीसीतारामभट्ट महोदयेन
(C) पं० विद्याधरशास्त्रि महोदयेन
(D) श्रीकृष्णरामभट्ट महोदयेन

60. कवितारचनाकार्यहेतोः कः मीरां पुरस्कारेण पुरस्कृतः ?

(A) पं० मधुसूदन ओझा
(B) डॉ० हरीराम आचार्यः
(C) पं० दुर्गाप्रसाद द्विवेदी
(D) पं० दुर्गाप्रसाद शर्मा

www.MDSmartClasses.com



Scanned with CamScanner